শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে

# ॥ চতুঃসপ্ততিতমঃ সর্গঃ ॥


*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ চতুঃসপ্ততিতমঃ সর্গঃ ॥

## ৱিশ্ৱামিত্রস্য স্বাশ্রমং প্রতি প্রস্থানং জনককর্তৃকং কন্যানাং কৃতে প্রচুরধনদানং রাজ্ঞো দশরথস্য ৱিদাপনং চ মার্গে শুভাশুভশকুনোদযঃ পরশুরামস্যাগমনং চ

অথ রাত্র্যাং ৱ্যতীতাযাং ৱিশ্ৱামিত্রো মহামুনিঃ।
আপৃষ্টৱা তৌ চ রাজানৌ জগামোত্তরপর্ৱতম্॥ **1.74.1** ॥

ৱিশ্ৱামিত্রে গতে রাজা ৱৈদেহং মিথিলাধিপম্।
আপৃষ্টৈৱৱ জগামাশু রাজা দশরথঃ পুরীম্॥ **1.74.2** ॥

অথ রাজা ৱিদেহানাং দদৌ কন্যাধনং বহু।
গৱাং শতসহস্রাণি বহূনি মিথিলেশ্ৱরঃ॥ **1.74.3** ॥

কম্বলানাং চ মুখ্যানাং ক্ষৌমান্ কোট্যম্বরাণি চ।
হস্ত্যশ্ৱরথপাদাতং দিৱ্যরূপং স্বলঙ্কৃতম্॥ **1.74.4** ॥

দদৌ কন্যাশতং তাসাং দাসীদাসমনুত্তমম্।
হিরণ্যস্য সুৱর্ণস্য মুক্তানাং ৱিদ্রুমস্য চ॥ **1.74.5** ॥

দদৌ রাজা সুসংহৃষ্টঃ কন্যাধনমনুত্তমম্।
দত্ত্বা বহুৱিধং রাজা সমনুজ্ঞাপ্য পার্থিৱম্॥ **1.74.6** ॥

প্রৱিৱেশ স্বনিলযং মিথিলাং মিথিলেশ্ৱরঃ।
রাজাপ্যযোধ্যাধিপতিঃ সহ পুত্রৈর্মহাত্মভিঃ॥ **1.74.7** ॥

ঋষীন্ সর্ব্বান্ পুরস্কৃত্য জগাম সবলানুগঃ।
গচ্ছন্তং তু নরব্ব্যাঘ্রং সর্ষিসঙ্ঘং সরাঘৱম্॥ **1.74.8** ॥

ঘোরাস্তু পক্ষিণো ৱাচো ৱ্যাহরন্তি সমন্ততঃ।
ভৌমাশ্চৈৱ মৃগাঃ সর্ৱে গচ্ছন্তি স্ম প্রদক্ষিণম্॥ **1.74.9** ॥

তান্ দৃষ্টৱা রাজশার্দূলো ৱসিষ্ঠং পর্যপৃচ্ছত।
অসৌম্যাঃ পক্ষিণো ঘোরা মৃগাশ্চাপি প্রদক্ষিণাঃ॥ **1.74.10** ॥

কিমিদং হৃদযোৎকম্পি মনো মম ৱিষীদতি।
রাজ্ঞো দশরথস্যৈতচ্ছ্রুৎৱা ৱাক্যং মহানৃষিঃ॥ **1.74.11** ॥

উৱাচ মধুরাং ৱাণীং শ্রূযতামস্য যৎ ফলম্।
উপস্থিতং ভযং ঘোরং দিৱ্যং পক্ষিমুখাচ্চ্যুতম্॥ **1.74.12** ॥

মৃগাঃ প্রশমযন্ত্যেতে সন্তাপস্ত্যজ্যতামযম্।
তেষাং সংৱদতাং তত্র ৱাযুঃ প্রাদুর্বভূৱ হ॥ **1.74.13** ॥

কম্পযন্ মেদিনীং সর্ৱাং পাতযংশ্চ মহাদ্রুমান্।
তমসা সংৱৃতঃ সূর্যঃ সর্ৱে নাৱেদিষুর্দিশঃ॥ **1.74.14** ॥

ভস্মনা চাৱৃতং সর্ৱং সম্মূঢমিৱ তদ্বলম্।
ৱসিষ্ঠ ঋষযশ্চান্যে রাজা চ সসুতস্তদা॥ **1.74.15** ॥

সসংজ্ঞা ইৱ তত্রাসন্ সর্ৱমন্যদ্বিচেতনম্।
তস্মিংস্তমসি ঘোরে তু ভস্মচ্ছন্নেৱ সা চমূঃ॥ **1.74.16** ॥

দদর্শ ভীমসঙ্কাশং জটামণ্ডলধারিণম্।
ভার্গৱং জামদগ্ন্যেযং রাজা রাজৱিমর্দনম্॥ **1.74.17** ॥

কৈলাসমিৱ দুর্ধর্ষং কালাগ্নিমিৱ দুঃসহম্।
জ্ৱলন্তমিৱ তেজোভির্দুর্নিরীক্ষ্যং পৃথগ্জনৈঃ॥ **1.74.18** ॥

স্কন্ধে চাসজ্জ্য পরশুং ধনুর্ৱিদ্যুদ্গণোপমম্।
প্রগৃহ্য শরমুগ্রং চ ত্রিপুরঘ্নং যথা শিৱম্॥ **1.74.19**॥

তং দৃষ্টৱা ভীমসঙ্কাশং জ্ৱলন্তমিৱ পাৱকম্।
ৱসিষ্ঠপ্রমুখা ৱিপ্রা জপহোমপরাযণাঃ॥ **1.74.20**॥

সঙ্গতা মুনযঃ সর্ৱে সঞ্জজল্পুরথো মিথঃ।
কচ্চিৎ পিতৃৱধামর্ষী ক্ষত্রং নোৎসাদযিষ্যতি॥ **1.74.21**॥

পূর্ৱং ক্ষত্রৱধং কৃৎৱা গতমন্যুর্গতজ্ৱরঃ।
ক্ষত্রস্যোৎসাদনং ভূযো ন খল্ৱস্য চিকীর্ষিতম্॥ **1.74.22**॥

এৱমুক্ত্ৱার্ঘ্যমাদায ভার্গৱং ভীমদর্শনম্।
ঋষযো রাম রামেতি মধুরং ৱাক্যমব্রুৱন্॥ **1.74.23**॥

প্রতিগৃহ্য তু তাং পূজামৃষিদত্তাং প্রতাপৱান্।
রামং দাশরথিং রামো জামদগ্ন্যোঽভ্যভাষত॥ **1.74.24**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে চতুঃসপ্ততিতমঃ সর্গঃ ॥